Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 4 | ISSN : 2581- 6306

# परिणयकाव्यपरम्परायां कालिन्दीपरिणयमहाकाव्यस्य स्थानम्

**सञ्जिता पाङ्गा**
शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Article Info**
Volume 5, Issue 4
Page Number : 66-73

**Publication Issue :**
July-August 2022

**Article History**
Accepted : 01 July 2022
Published : 20 July 2022

**शोधसारः** - सुविस्तृतायां संस्कृतकाव्यरचनापरम्परायां नानाविधानानि काव्यानि समुपलभ्यन्ते। तेषु दूतकाव्यानि, विलासकाव्यानि, लहरीकाव्यनि, चरितकाव्यनि, विजयकाव्यानि, परिणयकाव्यप्रमुख्यानि। यद्यपि परिणयकाव्यानां सूदीर्घा सूची नैव प्राप्यते, तथापि चक्रकविना प्रणीतं जानकीपरिणयकाव्यमारभ्य डाॅ.जयमन्तमिश्रप्रणीतं कालिन्दीपरिणयपर्यन्तं परिणयकाव्यपरम्परामनुसृत्य शोधपत्रमिदं प्रकल्पितम्।

**सूचकशब्दाः** – परिणयकाव्यपरम्परा, पार्वतीपरिणयम्, सुभद्रापरिणयम्, वासन्तिकापरिणयम् वल्लीपरिणयम्, अनुमितिपरिणयम्, कालिन्दीपरिणयम्, डाॅ. जयमन्तमिश्रः इत्यादयः।

साहित्येषु सुप्राचीनम् समृद्धञ्च संस्कृतसाहित्यम्। संस्कृतभाषायामेवोपनिबद्धं संस्कृतवाङ्मयं निखिलवाङ्मयानतिशेते। संस्कृतवाङ्मये समग्रविषयाणां सूक्ष्मातिसूक्ष्मवर्णनमतीव सुष्ठुरीत्या प्रतिपादितमस्ति। संस्कृतसाहित्ये काव्यानामस्ति विलक्षणं स्थानम्। येषां प्रणयनं बहुप्राचीनकालादेव विलोक्यते। संस्कृतस्य काव्यानि रामायण-महाभारत-पुराणानि बीजरूपेण आश्रयन्ते। संस्कृतसाहित्ये नैके कवयः महर्षिवाल्मीकेरारभ्य साम्प्रतं यावत् बहुविधानि काव्यानि विरचितानि। आलङ्कारिकदृष्ट्या एतानि सर्वाण्येव काव्यानि विभागद्वयेन विभक्तानि। एतत्तु आलङ्कारिकशिरोमणिना विश्वनाथकविराजेनोक्तम्। तद्यथा –

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।**[1]

तत्र दृश्यकाव्यस्य परिसरे नाटकप्रकरणादीनि दशरूपकाणि नाटिकात्रोटकादीनि अष्टादशोपरूपकाणि चान्तर्भवन्ति। एवमेव श्रव्यकाव्यपरिसरे पद्यकाव्य-गद्यकाव्य-चम्पुकाव्यञ्चेति। पद्यकाव्येषु महाकाव्य-खण्डकाव्य-नीतिकाव्य-यमककाव्यादीनि चान्तर्भवन्ति। सत्सु अपि बहुषु काव्यभेदेषु श्रव्यकाव्यान्तर्गतं महाकाव्यं भवति संस्कृतसाहित्ये परमाह्लादप्रदायकम्। येषामवलोकनेन सहृदयाः विज्ञाः काव्यपिपासवः समाजे नूतनविचाराणाम्, नूतनभावानाञ्च प्रचारप्रसारं कुर्वन्ति इतरान् च प्रेरयन्ति।

भारतीयसाहित्याकाशे काव्यमहाकाव्यानां च परम्परा बहुप्राचीनकालात् इदानीं यावत् अनुवर्तिताऽस्ति। अस्यां परम्परायां विविधानि काव्यानि विरचितानि सन्ति। यथा- वाल्मीकिरामायण-महाभारत-बुद्धचरित-रघुवंश-कुमारसम्भव-किरातार्जुनीय-शिशुपालवध-जानकीहरण-नैषधीयचरितादीनि। एवमेवाधुनिकसंस्कृतसाहित्ये आधुनिककविभिः विरचितानि संस्कृतमहाकाव्यान्यपि बहूनि सन्ति। तानि यथा- बोधिसत्वचरितमहाकाव्यम्, रामकीर्तिमहाकाव्यम्, जानकीजीवनम्, महर्षिदयानन्दचरितम्, उत्तरनैषधीयचरितम्, गान्धिचरितम्, विवेकानन्दचरितम्, इन्दिरागान्धिचरितम्, भारतविजयम्, बलदेवचरितम्, प्रसन्नभारतम्, वैदेहीचरितम्, सीताचरितम्, श्रीमदनिरुद्धायनम्, भार्गवीयञ्चेति। एवमेव नैके

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

संस्कृतकवयोऽधुनाऽपि काव्यमहाकाव्यनाटकोपन्यासादिलेखने बद्धपरिकराः विलसन्ति। एतादृशेषु आधुनिककाव्यप्रणेतृषु विविधविद्याविशारदः महामहोपाध्यायः डाॅ. जयमन्तमिश्रमहोदयः अन्यतमः। येन विरचितं 'कालिन्दीपरिणयमहाकाव्यम्' आह्लादकत्वं वर्तते।

अद्यावधि सुविस्तृतायां संस्कृतकाव्यरचनापरम्परायां नानाविधानि काव्यमहाकाव्यानि समुपलभ्यन्ते। परं तत्र परिणयकाव्यरचनापरम्परा नातिदीर्घा। संस्कृतवाङ्मये प्राप्तपरिणयकाव्येषु कानिचन महाकाव्येषु, कानिचन चम्पूकाव्येषु, कानिचन रूपकेषु चान्तर्भवन्ति। साम्प्रतं तेषां परिणयकाव्यानां परिचयः प्रदीयते –

**वासन्तिकापरिणयम्-** षोडशशतकस्य विशिष्टकवयः शठकोपस्वामीत्याख्याः तिरुमालाचार्याः (अहोविलमठस्य सप्तमपीठाधिपतयः) वासन्तिकापरिणयमिति नाटकं रचितवन्तः। पञ्चाङ्कविशिष्टे नाटकेऽस्मिन् महाविष्णोरवतारभूतेन अहोविलेश्वरेण सह शबरराजपुत्र्याः वासन्तिकायाः परिणयः वर्णितः।

**वल्लीपरिणयम् –** षोडशशतकस्य अपरः एकः कविः भवति भास्करयज्वा। तेन विरचितं रूपकं भवति बल्लीपरिणयम्। पञ्चाङ्कविशिष्टनाटकेऽस्मिन् शिवपुत्रकुमारेण साकं इन्द्रकन्यायाः वल्ल्याः परिणयः वर्णितः। नाटकस्यास्य अङ्गीरसः भवति शृङ्गारः अङ्गरसाश्च वीरादयः।

**सत्यभामापरिणयम्-** श्रीकृष्णसत्यभामयोः परिणयात्मकमिदं षोडशशतकस्य सुप्रसिद्धं नाटकम्। पञ्चाङ्कविशिष्टनाटकमिदं लक्ष्मणस्य पुत्रेण स्फुलिङ्गेन (मल्लिकार्जुनेन) विरचितम्।

**विद्यापरिणयम्-** सप्तदशशतके कविः आनन्दरायमखिविरचितं सप्ताङ्कविशिष्टं नाटकं भवति विद्यापरिणयम्। इदं प्रतीकात्मकं नाटकम्। नाटकेऽस्मिन् आध्यात्मिकविषयान् पात्ररूपेण कविः सङ्गृहीतवान्।

**प्रभावतीपरिणयम् -** सप्तदशशतकस्य विख्यातकविना हरिहरोपाध्यायेन विरचितं पुराणाश्रितं नाटकमिदं प्रभावतीपरिणयम्। नाटकस्यास्य नायकः श्रीकृष्णपुत्रः प्रद्युम्नः नायिका च वज्रनाभकन्या प्रभावती। षष्ठाङ्कविशिष्टनाटकेऽस्मिन् प्रभावतीप्रद्युम्नयोः परिणयः वर्णितः।

**सुभद्रापरिणयम्-** सप्तदशशतकस्य चोलप्रदेशीयकविः नल्लादीक्षितः (भूमिनाथः) नाटकमिदं विरचितवान्। महाभारतपुराणेषु सुप्रसिद्धकथामश्रित्य पञ्चाङ्कविशिष्टे नाटकेऽस्मिन् अर्जुनेन सुभद्रायाः अपहरणं विवाहश्च कृतः इति वर्णितम्।

**रुक्मिणीपरिणयम्**– अष्टादशशतकस्य विख्यातकविः आसीत् रामवर्मा। तेन विरचितं सुप्रसिद्धं नाटकं भवति रुक्मिणीपरिणयम्। नाटकस्यास्य विषयः द्वारकाधीशेन श्रीकृष्णेन रुक्मिण्याः अपहरणं कृतम्,विवाहश्च कृतः इति।

**रुक्मिणीपरिणयनाटकम्-** अष्टादशशतकस्य अपरकविः रमापत्युपाध्यायोऽपि षष्टाङ्कविशिष्टं रुक्मिणीपरिणयनाटकं रचितवान्। दरभङ्गायाः राज्ञः नरेन्द्रसिंहस्य कमलेश्वरीस्नानयात्रायाः पावनावसरे नाटकमिदं प्रदर्शितम्।

**वसुमतीपरिणयम्**– अष्टादशशतकस्य कविः जगन्नाथः नाटकमिदं विरचितवान्। असौ तञ्जरस्य महाराजप्रतापसिंहस्य (1739 – 1763 ई.) आश्रिताः आसीत्। पञ्चाङ्कविशिष्टे नाटकेऽस्मिन् राज्ञा गुणभूषणेन साकं वसुमत्याः परिणयः वर्णितः।

**जानकीपरिणयम्-** अष्टादशशतकस्य कविना रामभट्टदीक्षितेन विरचितं सप्ताङ्कविशिष्टमिदं जानकीपरिणयनाटकम्। वाल्मीकिरामायणकथामाश्रित्य रचितेऽपि ग्रन्थेऽस्मिन् सन्दर्भानुचितानि कविना स्वकल्पनया कानिचित् नूतनपात्राणि संयोजितानि।

**अनुमितिपरिणयम्**[2]– अष्टादशशतकस्य मद्राजकविना नृसिंहेन रचितमिदम् अनुमितिपरिणयम् नाटकम्। प्रतीकात्मकनाटकस्यास्य पात्राणि दर्शनाश्रितानि। अत्र नायकः न्यायरसिकः नायिका अनुमितिः च। अपरपात्राणि यथा – साक्षात्कारिणी (न्यायरसिकस्य प्रथमा पत्नी), तर्कसारः (न्यायरसिकस्य सखा), बुद्धिलता (साक्षात्कारिण्याः सखी) प्रभृतिनि। ग्रन्थेऽस्मिन् अनुमितिन्यायरसिकयोः परिणयः वर्णितः।

**विषमपरिणयम्**– गजेन्द्रशङ्करपण्ड्याविरचितं विषमपरिणयनाटकमिदं पञ्चाङ्कविशिष्टम्। श्रीमन्तः पण्ड्यामहोदयाः विंशशतकस्य संस्कृतनाट्यकारेषु भजन्ते प्राधान्यम्। अत्र कस्याश्चिल्लावण्यवत्याख्याया अप्राप्तयौवनायाः केनचिद् वृद्धेन विषमविवाहकथां परिकल्प्य कविः कुप्रथामिमां सामाजिकं कलङ्कं मत्वा तन्निराकर्तुं कान्तासम्मिततयोपदेशेन सामाजिकान् बोधयति।

**वैदेहीपरिणयम्**– खण्डकाव्यस्य प्रणेत्रा श्रीभूपेन्द्रनाथशुक्लमहोदयेन (1918–1992ई.) वाल्मीकिरामायणमाश्रित्य खण्डकाव्यमिदं विरचितम्। ग्रन्थेऽस्मिन् श्रीरामसीतयोः परिणयः रसव्यञ्जकः।

**मद्रकन्यापरिणयचम्पूः** – सप्तदशशतकस्य विशिष्टकविः दत्तात्रेयपुत्रगङ्गाधरः। तेन विरचितमिदं मद्रकन्यापरिणयचम्पूकाव्यम्। श्रीमद्भागवतपुराणमाधारिकृत्य ग्रन्थेऽस्मिन् श्रीकृष्णेन साकं मद्रकन्यायाः लक्ष्मणायाः परिणयः वर्णितोऽस्ति।

**सीतापरिणयमहाकाव्यम्**– अष्टादशशतकस्य कविः श्रीसूर्यनारायणाध्वरिविरचितम् द्वादशसर्गविशिष्टमिदं सीतापरिणयमहाकाव्यम्। वाल्मीकिरामायणस्य बालकाण्डार्गतस्य सीताकल्याणपर्यन्तं कथां वर्णनीयविषयत्वेन उपकल्प्य सीतापरिणयाख्यं महाकाव्यं प्रणीतम्।

**राधापरिणयमहाकाव्यम्**– विंशशतकस्य कविः वद्रिनाथझा। तेन विरचितमिदं राधापरिणयमहाकाव्यम्। महाकाव्येऽस्मिन् रधाकृष्णयोः मिलनगाथा वर्णिता।

**कान्तिमतीपरिणयनाटकम्**– चोक्कनाथकविविरचितं पञ्चाङ्कविशिष्टं शृङ्गाररसप्रधाननाटकमिदं कान्तिमतीपरिणयनाटकम्। अत्र नायकः शाहजीमहाराजः नायिका कान्तिमती च। 1982ई. तमे वर्षे पि.एम. पद्मनाभमहोदयेन ग्रन्थस्यास्य सम्पादनं प्रकाशानञ्चाकरोत्।

**शशिकलापरिणयम्**- 1997ई. तमे वर्षे दरभङ्गायाः कविः ऋद्धिनाथझा महोदयः पञ्चाङ्कविशिष्टं नाटकमिदं विरचितवान्।

उपर्युक्तानि परिणयकाव्यान्यतिरिच्य कानिचन आधुनिकपरिणयकाव्यानि यथा– शङ्करलालमहेश्वरस्य पार्वतीपरिणयनाटकम् (1911ई.), बङ्गीयकविविधुशेखरभट्टाचार्यस्य उमापरिणयमहाकाव्यम्, बङ्गीयकविचन्द्रकान्ततर्कालङ्कारस्य सीतापरिणयमहाकाव्यम्, भुवनेश्वररथस्य लक्ष्मणापरिणयमहाकाव्यम्, उत्कलीयकवेः भुवनेश्वरदत्तस्य रुक्मिणीपरिणयमहाकाव्यम्, आन्ध्रीयकवेः के.एस्. नागराजनस्य लवलीपरिणयमहाकाव्यम् (1॰सर्गः), वी.रामरायमहोदयस्य रुक्मिणीपरिणयचम्पूकाव्यम्, श्रीहेमचन्द्ररायस्य सत्यभामापरिणयहाकाव्यम्, केरलीयकवेः सुन्दररामआय्यरस्य उमापरिणयम्, नरेशशास्त्रिणः परिणयमीमांसा, श्रीनिवासाचार्यस्य पद्मिनीपरिणयम्, डा॰ जयमन्तमिश्रस्य कालिन्दीपरिणयमहाकाव्यम्, हुलगी श्रीनाथाचार्यस्य पद्मावतीपरिणयनाटकमित्यादिनि।

**कालिन्दीपरिणयमहाकाव्यम्** - महामहोपाध्यायडा॰.जयमन्तमिश्रेण सम्पादितमिदं ‘कालिन्दीपरिणयमहाकाव्यम्’ विहारराज्यस्य दरभङ्गानगरात् 2009ई तमे सम्बत्सरे प्रकाशितम्। महाकाव्यरचनापरम्परायां काव्यस्यास्य एकं स्वतन्त्रं

स्थानं वर्तते। श्रीकृष्णस्य प्रेयसीषु कालिन्दी अल्पप्रसिद्धा भवति। तस्या: प्रेम, दिव्यता, व्यपकता, श्रेष्ठता चेत्यादिविषये साधारणजना: स्वल्पमेव जानन्ति। परं एतद् सर्वं श्रीमद्भागवत-महापुराण-गर्गसंहितादिग्रन्थेषु परिलक्ष्यते। तस्मात् मधुप्रवृत्ति: इव सारं संगृह्य कविना सहजसरलभाषया काव्यमिदं विरचितम्। काव्यमिदं पठित्वा सहृदया: सदा प्रमुदिता: भवेदिति कवे: आशय:[3]।

ग्रन्थारम्भे ग्रन्थकर्ता विघ्नविघाताय महाकाव्यस्य मङ्गलमाचरति तद्यथा –

**सच्चिन्मयं वासुदेवं श्रीकृष्णं पुरुषोत्तमम्।**

**करुणावरुणं वन्दे गौरश्यामं रसात्मकम्।।**इति।।[4]

तदनन्तरं कविना कालिन्द्या: नैकै: विशेषणै: परिचय: क्रियते। भास्वद्भास्वर: भानुदेवतनया श्रीकृष्णदेवप्रिया राधापाद सुपद्मरागरासिका तनुरुचिर्दिव्यप्रभोद्भासिता स्वर्णाभा सुसुधांशु सुन्दरमुखी च षोडशवार्षिकी एषा कालिन्दी। सा श्रीकृष्णभावाप्तये श्रीकृष्णार्चनामालिकां निजकरे धृत्वा प्रतीक्षति। सा संख्यातीतकाले स्वयम्वरे मनसि श्रीकृष्णमिच्छति। एतदर्थं कालिन्दी पित्रादित्येन निर्मितमन्दिरे उषित्वा एकाग्रचित्ते श्रीकृष्णं भजति। तद्यथा–

**घनश्यामं घनश्यामं घनश्यामं नमाम्यहम्।**

**घनश्यामं सतां काम्यं यावत् प्राप्यं वसाम्यहम्।।**[5]

श्रीकलिन्दजाया माथुरे क्षेत्रेऽवतरण–वर्णनाख्ये द्वितीयसर्गे श्रीकृष्णस्याज्ञया यमुनाया: गोलोकात् मर्त्यलोकम् आगमनवर्णना परिलक्ष्यते। तत्र मार्गस्य वर्णना अतुलनीया। गोलोके स्थितावसरे सूर्यपुत्री कालिन्दी श्रीकृष्णेन साकं निवासं चकार। परं यदा भक्तनृणां सुकारिणा भगवान् दुष्टविनाशाय मर्त्ये आगमनात् प्राक् प्राणसमां सुदिव्यां कालिन्दीं गोलोकात् जगतीतले प्रवर्तयामास। तृतीयसर्गे कालिन्दी–श्रीकृष्णयो: नित्यसम्बन्धवर्णितोऽस्ति। अत्र कविना महर्षिव्यासेन श्रीकृष्णस्य कलिन्दजाया: च सम्बन्धरूपादिकं स्वदिव्यचक्षुषा यद्दृष्टं तदेव प्रतिपादितम्। राधाश्रीकृष्णयो: दिव्यसम्बन्धविषये यमुनाया: उक्ति: यथा –

**स एव सा स सैवास्ति वंशी तत्प्रेमरूपिका।**

**श्रीकृष्ण-नख-चन्द्रालि-सङ्गाच्चन्द्रावली स्मृता।।**[6]

श्रीकृष्णकालिन्दी–भावानुभाववर्णनाख्यस्य चतुर्थसर्गस्य विषय: भवति कालिन्दीश्रीकृष्णयो: परस्परम् आत्मचिन्तनम्। पञ्चमेसर्गे भगवत: श्रीकृष्णस्य दिव्यस्वभावप्रभावसम्बन्धितानि निगूढतत्त्वानि समुपस्थापितानि। तद्यथा – भगवान् श्रीकृष्ण: अनन्तरूप:, जगतामधीश:, समग्ररूपं वस्तु स्वयं जानाति, तेनैव सर्वं सततं शोभते। अन्तर्यामी असौ अपरस्य मनोदशां विज्ञाय तथैव विधातुं प्रयतते। सदा भक्तवरस्य दु:खं हृत्वा सुखं प्रददाति। प्रभुवर्यचित्ते जगति विद्यमानानि सर्वाणि वस्तूनि हस्ते आमलकवत् विभान्ति। षष्ठे सर्गे विवाहस्वरूपवर्णितमस्ति।[7]

सप्तमसर्गे श्रीकृष्ण: पार्थेन सह भ्रमणाय यमुनातटमगच्छत्, तदा तत्र दिव्यां भव्यां मनोहरां कालिन्दीमपश्यत्। भगवान् श्रीकृष्ण: तामवलोक्य अर्जुनं तत्र अप्रेषयत्। श्रीफाल्गुन: तामाहूय तत्र वसनस्य कारणमपृच्छत्। तदा श्रीयमस्वसा यमुना तमकथयत् – काङ्क्षितं दिव्यं वरं श्रीकृष्णं प्राप्तुं वसाम्यत्र। अर्जुनमुखात् सर्वं संश्रुत्य भगवान् स्वयं तत्रागच्छत्। तत्र परस्परं दर्शनेन उभौ आनन्दमनुभवताम्।[8]

अष्टमेसर्गे कालिन्दीश्रीकृष्णयो: विवाह: वर्णितोऽस्ति। तत्रादौ कालिन्द्या भगवत्या: गौर्या: स्तुति: क्रियते। तत्र ध्यात्वा सा भवानीं प्रार्थयति – हे पर्वतराजस्य पुत्री गौरि ! यथा त्वं शिवान्विता जाता तथैव श्रीकृष्ण: प्रसन्नो भूत्वा हृदा मम पाणिं गृह्णातु इति। इत्थं सा कलिन्दजा स्वमनसा सदा श्रीकृष्णं ध्यायन्ती चिन्तयन्ती चासीत्। श्रीहरि: कालिन्दीं

परिणेतुमिच्छति इति ज्ञात्वा अन्तर्ध्यानपरायणा सा विवस्वत्सुता हृदा सम्मोदमाना जाता। नवमे सर्गे श्रीकालिन्दीवासुदेवयोः मिलनं वर्णितस्ति। मिलनं तु द्वयोः भिन्नजीवयोर्मध्ये जायते। यत्र तद्वयोर्मध्ये कदाचन विच्छेदः न जायते तर्हि तत्र तन्मिलनमसम्भवम्। यथा नीराद्रसस्य निर्यासकथनं नैव युज्यते, यथा अनलस्य तेजस्त्वं पृथक्कर्तुं न शक्यते, यथा वायोः स्पर्शगुणं न विच्छिद्यते, यथा गन्धेन सह पृथिव्याः सम्बन्धः, यथा समवायात् सम्बन्धस्य पृथकमसमर्थम्, तथैव कालिन्द्या साकं वासुदेवस्य सङ्गमः नित्यः सनातनश्च। दशमसर्गे कालिन्द्याः विरहवर्णितमस्ति। एकदा श्रीकृष्णे गते कार्यान्तरे सूर्यतनया कालिन्दी तस्य विरहे तापविवर्द्धकं हृदयभावविमर्दनकारकञ्च विलापमकरोत्। एकादशसर्गे श्रीकालिन्दीकृष्णयोः दिव्यसम्बन्धः वर्णितोऽस्ति। सुम्लानभावस्य विघातको अम्लानभावस्य विधायकश्चासौ श्रीकृष्णः प्रणतप्रियस्य स्वभक्तस्य भावानुरागात् तमनुसरति। प्रणतस्य सुखदुःखयोः हर्ता कर्त्ता चायं भक्तस्य दुःखेन दुःखी सुखेन च सुखी भवति। मित्रामित्रमिति द्विधाचारमकृत्वा जगत्सन्तुलनाय सर्वत्र समानभावं प्रदर्शयति। ये तं भजन्ति सोऽपि तान् भजति, तेभ्य इष्टं फलञ्च ददाति। तस्य कोऽपि प्रेरकः किञ्चिदपि करणञ्च न विद्यते। स्वयं सः भुवनस्यास्य रक्षोकभक्षकश्च। अतः कालिन्दीश्रीकृष्णयोर्मध्ये विद्यमानं दिव्यसम्बन्धं कोऽपि प्रहर्तुं विच्छेत्तुं च न वर्तते। इत्थं विज्ञाय नित्यमानन्दमापन्नौ सुखिनौ मिलितौ तौ सत्यौ हृदा मुदा सततं विहरतः। एवं सा यदुनन्दनाश्रया कलिन्दकन्या सदा यदुनन्दने निरतं प्रतिभाति। श्यामेन संयुक्ता श्यामसङ्गिनी कालिन्दी परमानन्दं प्राप्य वृन्दावनविहारिणी इव साफल्येन समायुक्ता जाता। एवं परस्परौ तौ दिव्यसम्बन्धभावमवाप्य आनन्दौ अनुभवतः।[9]

द्वादशसर्गे चतुर्चत्वारिंशत् श्लोकेषु ज्योतिषशास्त्रसमन्वितं विविधफलं वर्णितमस्ति। यदा भुवने षण्णां ग्रहाणामेकत्र योगः भवति तदा गोलयोगः जायते। यस्मात् सृष्टप्रलयात् जननी अङ्कात् पुत्रं त्यजति, नृपाणां नाशः भवति, वसुधा चलति, नदी शुष्यति च। यस्य प्रभावः देवराजेन्द्रोऽपि प्राप्नोति। जगति भानुः, शशी, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुश्चेति नवग्रहाः सुखदुःखविधायकाः। ग्रहदशायां लोके नित्यं नैमित्तिकं काम्यञ्चेति त्रिविधं कर्म लोकैः नित्यं विधीयते। प्रसङ्गेऽस्मिन् कविना प्रायश्चित्तविधानं कथ्यते।[10] त्रयोदशसर्गे यादवकौरवयोः रमणीभिः भगवतः श्रीकृष्णस्य भुवनरञ्जन-लीला वर्ण्यते। एकदा प्रसन्नावदना द्रुपदात्मजा पाञ्चाली श्रीकृष्णमहिषीरुवाच - कथं नररूपी भगवान् श्रीकृष्णः मायया युस्माभिस्सह लीलां सम्पादयतीति।[11]

द्रौपद्याः प्रश्नस्योत्तरे रुक्मिणीप्रभृतिश्रीकृष्णमहिष्यः स्वस्वोत्कर्षं प्रदर्शयन्ति। श्रीकृष्णमहिषी-द्रौपदीमिलनात् परं पाञ्चाली-प्रभृतीनां मनोभावानुभाव-वर्णनाख्ये चतुर्दशसर्गे सर्वात्मानं भक्तक्लेशहारिणं भगवन्तं श्रीकृष्णं प्रति पत्नीनां प्रणयगाथाः संश्रुत्य कुन्ती-गान्धारी-द्रौपदी-सुभद्रादयाः राजमहिष्यः गोप्यश्च विस्मिता अभवन्। स्वपत्नीभिः साकं श्रीकृष्णस्य अलौकिकं प्रेम ताः मुग्धयति। पञ्चदशसर्गे नन्दः, उपनन्दः, वृषभानुप्रभृतीनां परिचयवर्णनमस्ति। तत्र गोप्यः काः? केन पुण्येन ताः 'गोपी' इति पदवीं लब्धवत्यश्चेत्यादयः विषयाः परिलक्ष्यन्ते। नित्यगोलोके वृन्दावनवासिनो रसरूपस्य श्रीकृष्णस्य दिव्यरसपानप्रदानञ्चेति वर्णनाख्ये षोडशसर्गे रसस्वरूपस्य श्रीकृष्णस्य कथा वर्णिता। तद्यथा - भगवान् श्रीकृष्णः स्वयं रसराजः, अतः सः रसेन रासं कर्तुं समर्थः। यं लब्ध्वा नराः आनन्दमप्राप्नुवन्। श्रीकृष्णस्य रासलीलायां भगवान् स्वयं रसस्वरूपः, श्रीराधा रासस्वरूपिका, तस्या एवांशस्वरूपाः अपराः सर्वाः श्रीकृष्णनायिकाश्च। भगवतः दिव्यरसमिमं महायोगीभिः दिव्येन चक्षुषा विलोक्यते। लोके विद्यमानैः जनैः चर्मचक्षुषा तद्द्रष्टुं न शक्यते । तीर्थमाहात्म्यवर्णनाख्ये सप्तदशसर्गे पिण्डारकादीनां विभिन्नानां तीर्थानां वर्णना क्रियते। तीर्थस्य लक्षणविषये उच्यते कविना - यस्मात् पापादिकं तरति तत् तीर्थमित्युच्यते। तीर्थेषु नदीतीर्थं महतपुण्यस्थानं फलप्रदञ्च भवति। तत्र स्नानेन दानेन च मनस्कामना पूर्णा भवति। तदुक्तं -

**तरति पापादिकं यस्मात् तस्मात्तत् तीर्थमुच्यते।**

**पुण्यस्नानादिकं प्रोक्तं तीर्थं सद्भिर्महर्षिभिः॥**[12]

अष्टादशसर्गे अयोध्यादिसप्तपुरीणां माहात्म्यं वर्णितमस्ति। वेदेषु पुराणेषु सर्वशास्त्रेषु च अस्य माहात्म्यं वर्णितमस्ति। अस्मिन् भारतवर्षे विभिन्नेषु प्रस्थानेषु मोक्षदायिकाः सप्तपुर्यः तीर्थानीव विभान्ति। ताः यथा–

**अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका।**

**पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः॥**[13]

एवं क्रमेण कविना उपर्युक्तानां श्रीकृष्णस्य लीलाक्षेत्राणाम् अयोध्यादिनां सप्तपुरीणां वर्णना क्रियते। कविनाऽत्र सप्तपुरीणां वर्णना क्रियते। पूर्ववर्णितविषयान् मनसि दृढीकर्तुं विज्ञैः पुनस्मरणं परिकल्प्यते। तदर्थं महर्षिव्यासदेवेन श्रीमद्भागवतस्यान्ते समग्रगन्थस्य तत्त्वविमर्षणं क्रियते। महाकाव्येऽस्मिन्नपि ग्रन्थकारेण समग्रविषयान् सुविचार्य काव्यान्ते सहृदयानाम् उपहाररूपेण उपसंहारः (एकोनविंशतिसर्गः) प्रदीयते। तत्र प्रथमसर्गादारभ्य: अष्टादशसर्गपर्यन्तम् अष्टादशसु सर्गेषु कालिन्दी–श्रीकृष्णयोः दिव्यानि दिव्याश्रितानि कथानकानि वर्णितानीति।

सम्पूर्णे महाकाव्ये एकोनविंशतिसर्गेषु 69ँ श्लोकाः विलसन्ति। अत्र महाकाव्योचित– विविधप्रसङ्ग–विषय–तथ्यवर्णनादीनि संक्षिप्तरूपेण निरूपितानि। तत्रैव नायिकानायकयोः दिव्यसम्बन्ध–भावानुभाव–पाणिग्रहण–मिलन–विरहादीनि च वर्णितानि। एतदतिरिच्य काव्ये राहूपरागे स्नानदानादि फलवर्णनम्, तीर्थमाहात्म्यम्, वृषभानुजादीनां वर्णनम्, सप्तपुरीमाहात्म्यञ्च सन्ति। तस्मिन् तदानीन्तन सांस्कृतिकचित्रान्यपि प्रतिफलितानि। महाकाव्येऽस्मिन् कविना संस्कृतसाहित्यतत्त्वानां यथोचितं प्रयोगञ्च क्रियते। प्रसङ्गेऽस्मिन् कविना स्वयमेव काव्यान्ते यदुच्यते तद्यथा –

**श्रीकृष्णो भगवान्नेता नेत्री देवी कलिन्दजा।**

**माधुर्यरसराजोऽस्ति सन्माधुर्यादयो गुणाः॥**

**सन्माधुर्यादिभिर्जुष्टा वैदर्भ्यादि-सुरीतयः।**

**वृत्तयश्चात्र विद्यन्ते उपनागरिकादयः॥**

**अलंकारादिभिश्चेदं महाकाव्यं सुशोभते।**

**रसराजं वासुदेवं नायकं नायिकान्तथा॥**

**कलिन्दकन्यां कालिन्दीं सेवन्तेऽन्तःकरेण च।**

**रसराजो रासरूपो रसो राजायते यतः॥**[14]

**उपसंहारः** – इत्थं चक्रकविप्रणितजानकीपरिणयमहाकाव्यादारभ्य डा□.जयमन्तमिश्रस्य कालिन्दीपरिणयमहाकाव्यं यावत् संस्कृतपरिणयकाव्यपरम्परा विस्तृता। तत्र पुराणादिग्रन्थेभ्यः कालिन्दीश्रीकृष्णयोः परिणयगाथां संगृह्य मिश्रवर्येण स्वीयकवित्त्वशक्त्या प्रणीतेऽस्मिन् कालिन्दीपरिणये मौलिकतां स्पष्टम्। शोधपत्रस्यास्य अध्ययनेन भाविगवेषकाः परिणयकाव्यकृतीनां समीक्षणं कर्तुं समर्थाः भवेयु इति शम्।

**सन्दर्भग्रन्थसूची-**


1.साहित्यदर्पणः – 6.12

2. प्रकाशितनाटकस्यास्य असमाप्तमात्रिका मद्रास ओरियण्टल मैनु. ग्रन्थालयात् प्रप्यते।

3. सम्पूर्णं सन्महाकाव्यमिदं श्रीकृष्ण–कालिन्दीपदारविन्द–मकरन्द–रस–लोलुप–भ्रमर–पुञ्ज–गुञ्जस्वरूप–मानस–रसायनं जायतामिति शम्॥–1कालिन्दीपरिणयमहाकाव्यान्ते, पुटसङ्ख्या– 108.

[4]. तत्रैव. – 1.1

[5]. तत्रैव. – 1.7

[6]. तत्रैव.–3.10.

[7]. तत्रैव.– 6.13 स (विवाहः) न चैवास्ति युग्मस्य स्वेच्छया भ्रमणं तथा।
न वा नक्तगृहे गत्वा नग्ननृत्यविधायकः।।
न वा पत्युश्च श्रान्तस्य कान्तस्य सुखहेतवे।
सुमुखी सुदती भव्या कामिनी कामदा वरा।।
न वा विदेशगमने कार्यसाधन–साधिका।
एकाकि–गमनं यत्र बाधितं तस्य कारिका।।
लोकाचार–विरुद्धस्य कृत्यस्य संसाधिका।
स्वगुरून् सम्परित्यज्य स्वेच्छाचारप्रवर्तिका।।

[8]. तत्रैव. – 7.20–21 विधात्रा निर्मितं श्यामं सुन्दरं वीक्ष्य सा वरा।
मुमुदातेऽन्योन्यमालोक्य श्रीश्यामा–श्यामसुन्दरौ।।
परस्परानुरागेण चैकरूपौ सनातनौ।
संजातौ तौ सता सेव्यौ कालिन्दी–जगदीश्वरौ।।

[9]. तत्रैव.–11.31. अहोभाग्यमहोभाग्यमहोभाग्यश्च तद्द्वयोः।
दिव्यसम्बन्धमावाप्य जातावानन्दनाम्बुधौ।।

[1]0. का.परि. –12.13. विकर्माकर्मकृत्येषु प्रशान्त्यर्थं तथाविधम्।
निर्दोषत्वं च सम्प्राप्तुं प्रायश्चित्तं विधीयते।।

11.तत्रैव. –13.9–10 हे वैदर्भ्यच्युते भद्रे हे जाम्बवति कौसले।
हे सत्यभामे कालिन्दि शैव्ये रोहिणि लक्ष्मणे।।
हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान् स्वयम्।
उपयेमे यथा लोकमनुकुर्वन् स्वमायया।।

12. का.परि.–17.1

13. का.परि.–18.5.

14. तत्रैव.–पुटम्–108

**ग्रन्थपञ्जी**

1. उपाध्यायः बलदेव, *संस्कृत साहित्य का इतिहास,* चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 1968 ई.
2. उपाध्यायः रामजी, आधुनिक संस्कृत – नाटक, भाग–2, चौखम्बा विद्याभवन, वाराणसी, पूनर्मुद्रण्, 2014 ई.
3. उपाध्यायः रामजी, आधुनिक संस्कृत–नाटक, भाग–1, संस्कृत–परिषद्, सागरविश्वविद्यालयः, सागर, 1868ई.
4. डा□. वैस अरुणा कुमारी, *अर्वाचीन संस्कृत साहित्य की काव्यशास्त्रीय अध्ययन,* दुर्गा पाब्लिकेशन्स, दिल्ली, 2011 ई.
5. त्रिपाठी राधावल्लभ, *संस्कृत साहित्य का समग्र इतिहास,* प्रथम & द्वितीय खण्ड, जैन अमर प्रिंटिं प्रेस, दिल्ली, प्रथम संस्करण, 2018 ई.

6. मिश्रः महामहोपाध्यायः डा□ जयमन्त (ग्रन्थकारः), *कालिन्दीपरिणयमहाकाव्यम्,* इन्दिरा प्रकाशनम्, हनुमानगञ्जः, मिश्रटोला दरभंगा (विहार-846604), प्रथमं संस्करणम्, 2009ई.
7. मुखोपाध्यायः विमलाकान्त (सं), *साहित्यदर्पणः,* संस्कृत पुस्तक भाण्डार, *38* विधान सरणी, कलकाता-700006, द्वितीयं संस्करणम्, 2013 ई.
8. Prof. Satapathy Harekrishna (General Editor), Dr. K Suryanarayana (Editor), 20th *Century Sanskrit Poeties and their Contribution,* Vol-I & II, Prof. Ranganatha (Author), Rashtriya Sanskrit Vidyapeetha, Tirupati, 2010 B.C.